# शिवोपासन-मन्त्राः

## śivopāsana-mantrāḥ

निधनपतये नमः ॥१ ॥

nidhanapataye namaḥ |1|

निधनपतान्तिकाय नमः ॥२ ॥

nidhanapatāntikāya namaḥ |2|

ऊर्ध्वाय नमः ॥३ ॥

ūrdhvāya namaḥ |3|

ऊर्ध्वलिङ्गाय नमः ॥४ ॥

ūrdhvaliṅgāya namaḥ |4|

हिरण्याय नमः । ॥५ ॥

hiraṇyāya namaḥ |5|

हिरण्यलिङ्गाय नमः ॥६ ॥

hiraṇyaliṅgāya namaḥ |6|

सुवर्णाय नमः ॥७ ॥

suvarṇāya namaḥ |7|

सुवर्णलिङ्गाय नमः ॥८ ॥

suvarṇaliṅgāya namaḥ |8|

दिव्याय नमः ॥९ ॥

divyāya namaḥ |9|

radiosai

दिव्यलिङ्गाय॒ नमः ॥१० ॥

divyaliṅgāya̱ namaḥ |10|

भवाय॒ नमः ॥११ ॥

bhavāya̱ namaḥ |11|

भवलिङ्गाय॒ नमः ॥१२ ॥

bhavaliṅgāya̱ namaḥ |12|

शर्वाय॒ नमः ॥१३ ॥

śarvāya̱ namaḥ |13|

शर्वलिङ्गाय॒ नमः ॥१४ ॥

śarvaliṅgāya̱ namaḥ |14|

शिवाय॒ नमः ॥१५ ॥

śivāya̱ namaḥ |15|

शिवलिङ्गाय॒ नमः ॥१६ ॥

śivaliṅgāya̱ namaḥ |16|

ज्वलाय॒ नमः ॥१७ ॥

jvalāya̱ namaḥ |17|

ज्वललिङ्गाय॒ नमः ॥२८ ॥

jvalaliṅgāya̱ namaḥ |18|

आत्माय॒ नमः ॥२९ ॥

ātmāya̱ namaḥ |19|

radiosai

आत्मलिङ्गाय नमः ॥२० ॥

ātmaliṅgāya namaḥ |20|

परमाय नमः ॥२१ ॥

paramāya namaḥ |21|

परमलिङ्गाय नमः ।२२ ।

paramaliṅgāya namaḥ |22|

एतथ्सोमस्य सूर्यस्य सर्व-लिङ्गग्ं स्थापयति पाणिमन्त्रं पवित्रम् ।२३ ।

etathsomasya sūryasya sarva-liṅgagg sthāpayati pāṇimantraṁ pavitram |23|

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व माम्। भवोद्भवाय नमः ।२४ ।

sadyojātaṁ prapadyāmi sadyojātāya vai namo namaḥ|

bhave bhave nātibhave bhavasva mām| bhavodbhavāya namaḥ |24|

वामदेवाय नमो ॥२५ ॥

vāmadevāya namo |25|

ज्येष्ठाय नम ॥२६ ॥

jyeṣṭhāya namo |26|

श्श्रेष्ठाय नमो ॥२७ ॥

śśreṣṭhāya namo |27|

रुद्राय नमः ॥२८ ॥

radiosai

rudrāya namaḥ |28|

कालाय नमः ॥२९ ॥

kālāya namaḥ |29|

कलविकरणाय नमो ॥३० ॥

kalavikaraṇāya namo |30|

बलविकरणाय नमो ॥३१ ॥

balavikaraṇāya namo |31|

बलाय नमो ॥३२ ॥

balāya namo |32|

बलप्रमथनाय नम ॥३३ ॥

balapramathanāya nama |33|

स्सर्व-भूतदमनाय नमो ॥३४ ॥

ssarva-bhūtadamanāya namo |34|

मनोन्मनाय नमः ॥३५ ॥

manonmanāya namaḥ |35|

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्य-स्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥३६ ॥

radiosai

aghorebhyo'tha ghorebhyo ghoraghoratarebhyaḥ।
sarvebhya-ssarvaśarvebhyo namaste astu rudrarūpebhyaḥ.
।36।

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ॥३७॥

tatpuruṣāya vidmahe mahādevāya dhīmahi। tanno rudraḥ pracoodayāt ।37।

ईशान-स्सर्व-विद्याना-मीश्वर-स्सर्व-भूतानां ब्रह्माऽधिपतिर्ब्रह्मणोऽधिपतिऽर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

īśāna-ssarva-vidyānā-mīśvara-ssarva-bhūtānām brahmā'dhipatirbrahmaṇoo'dhipati'rbrahmā śivo me astu sadāśivoom. ।।

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरुपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः ॥

namo hiraṇyabāhave hiraṇyavarṇāya hiraṇyarupāya hirannyapataye'mbikāpataya umāpataye paśupataye namo namaḥ ।।

radiosai

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥

ṛtagṁ satyaṁ paraṁ brahma puruṣaṁ kṛṣṇapiṅgalam।
ūrdhvaretaṁ virūpākṣaṁ viśvavarūpāya vai namo namaḥ ।।

सर्वो वै रुद्र-स्तस्मै रुद्राय नमो अस्तु। पुरुषो वै रुद्र-स्सन्महो नमो नमः।

sarvo vai rudra-stasmai rudrāya namo astu। puruṣo vai rudra-ssanmaho namo namaḥ।

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु॥

viśvaṁ bhūtaṁ bhuvanaṁ citraṁ bahudhā jātaṁ jāyamānaṁ ca yat। sarvo hyeṣa rudra-stasmai rudrāya namo astu।।

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वोचेम शन्तमगं हृदे। सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु॥

kadrudāya pracetase mīḍhuṣṭamāya tavyase। vocema śantamagṁ hṛde। sarvo hyeṣa rudra-stasmai rudrāya namo astu।।

ॐ शान्तिः शान्तिः शान्तिः॥

om śāntiḥ śāntiḥ śāntiḥ।।